कुशाग्रञ्च दधि सर्पिः सतण्डुलम्। यवः सिद्धार्थकश्चैव अष्टाङ्गोऽर्घः प्रकीर्त्तितः” काशीखण्डम्। “तमर्घ्यमर्घ्यादिकयादिपूरुषः” माघः “अर्घ्यमर्घ्यमिति वादिनं नृपं सोऽनवेक्ष्य भरताग्रजो यतः” “अर्घानुपदमाशिषमिति” च रघुः। [पूज्यतमे महादेवे।

**अर्घीश** पु० अर्घोऽस्त्यस्य इनि देयत्वेन तेषु ईशः। सर्व्वदेवेषु

**अर्घ्य** त्रि० अर्हॢते पूज्यते अर्ह-ण्यत्-न्यङ्का० कुत्वम्- अर्घमर्हति अर्घ+यत् वा। १पूजनीये “तमर्घ्यमर्घ्यादिकयादिपूरुषः माघः”। अर्घाय देयं यत्। २पूजार्थे देये जलादौ। “तानर्घ्यानर्घ्यमादाय दूरात् प्रत्युद्ययौ गिरिः” कुमा०। “अनर्घ्यमर्घ्येण तमद्रिनाथः” कुमा०। अर्घं मूल्यमधिकमर्हति यत्। २जरत्कारतपोवनवृक्षोद्भवे मधुनि न० तस्य बहुमूल्यत्वात्तथात्वम्।

**अर्च** पूजायाम् उभ० भ्वादि०सक० सेट्। अर्चति ते आर्चीत् आर्चिष्ट। आनर्च-र्चे “पितॄंश्चैवाष्टकास्वर्च्चेत्” मनुः। “एवं हि सर्वभूतानि ब्राह्मणोनित्यमर्चति” मनुः। “रत्नपुष्पोपहारेण छायामानर्च पादयोः” रघुः “इन्द्रिष्ठमार्चीद्विबुधाधिपानाम्” “समीहे मर्त्तुमानर्चे तेन वाचाऽखिलं बलम्”। “आर्चीत् द्विजातीन् परसार्थविन्द्रान्” “प्रानर्चुरर्च्यं जगदर्चनीयम्” “विप्रानर्चेस्तथा स्तुवन्” इति च भट्टिः अर्चिः अर्चकः अर्चितः अर्चितवान् अर्चितुम् अर्चित्वा।

**अर्च** पूजायां चुरा० उभ० सक० सेट्। अर्चयति ते आर्चिचत् त। अर्चयामास “दूरस्थमार्चयेदेनम् मनुः। “स्वर्गौकसामर्चितमर्चयित्वा” कुमा०।

**अर्चक** त्रि० अर्चति अर्च-ण्वुल्। पूजके “ब्रह्मचारी व्रती च स्याद्गुरुदेवद्विजार्चकः” मनुः स्त्रियां टाप् अत इत्त्वम्।

**अर्चत्रि** त्रि० अर्च-वेदे बा०अत्रि। अर्चनीये। “अर्चत्रयो धुनयो न वीराः” ऋ० ६,६६,१०। “अर्चत्रयः अर्चनीयाः” भा०।

**अर्चत्य** त्रि०अर्च-भावे-अत्रि अर्चत्रिमर्चनमर्हति यत्। पूजनीये। “अर्चत्र्योमघवा नृभ्यः” ऋ०६,२४,१। “अर्चत्यः अर्चनीयः” भा०।

**अर्चन** न० अर्च-भावे ल्युट्। पूजने। “अरिष्टं नाशयेत् सर्व्वं ग्रहविप्रसुरार्चनम् पुरा०। [“निरतः पुरा०।

**अर्चना** स्त्री चु० अर्च-युच्। पूजायाम्। “देवार्चनायां

**अर्चनीय** त्रि० अर्च+अनीयर्। पूजनीये। “प्रानर्चुरर्च्यं जगदर्चनीयम्” भट्टिः।

**अर्चा** स्त्री अर्च्च-आधारे अङ्। १प्रतिमायाम् “आभिरूप्येण चार्चाया देवः सान्निध्यमृच्छति” ति०त० पुरा०। “देवार्च्चामग्रतः कृत्वा ब्राह्मणानां विशेषतः” आ०त०। भावेऽङ्। २पूजायाम् “लोकः पच्यमानश्चतुर्भिर्धर्मैः! ब्राह्मणं भुनक्त्यर्चया च दानेन चोज्यया दयया च”। शत०ब्रा०।

**अर्चि** स्त्री अर्च-इन्। वह्न्यादिशिखायाम्। “यस्या रुशन्तो अर्चयः प्रतिभद्रा अदृक्षत” ऋ०१,४८,१३, “तव ज्योतींष्यर्चयः” ऋ०८,४४,१७।

**अर्चित** त्रि०अर्च-क्त। १पूजिते “स्वर्गौकसामर्चितमर्चयित्वा” कुमा० २विष्णौ पु० “अर्चिष्मानर्चितः कुम्भः” वि०स०। “सर्व्वलोकार्चितैर्ब्रह्मादिभिरर्चितः” भा०।

**अर्चिरादिमार्ग** पु०अर्चिरादिभिस्तदभिमानिदेवैः उपलक्षितो मार्गः। देवयाने पथि उत्तरमार्गे। “तेऽर्चिषमभिसम्भवन्ति अर्चिषोऽहः, अह्न आपूर्य्यमाणपक्षम्, आपूर्य्यमाणपक्षात् यान् षडुदङ्ङेति मासांस्तान्, मासेभ्यः संवत्सरं, संवत्सराद् आदित्यम्, आदित्याच्चन्द्रमसं, चन्द्रमसो विद्युतं, तत्पुरुषोऽमानवः स एनान् ब्रह्म गमयत्येष देवयानः पन्थाः” छा०उ०। “आतिवाहिकास्तल्लिङ्गात्” शा०सूत्रे तेषां तदभिमानिदेवतापरतेत्युक्तम् “अग्निर्ज्योतिरहः शुक्लः षण्मासा उत्तरायणम् तत्र प्रयाता गच्छन्ति ब्रह्म ब्रह्मविदोजनाः” गीता।

**अर्चिव(म)त्** त्रि० अर्चिरस्त्यस्य मतुप् वेदे मस्य वः। दीप्तियुक्ते। “उद्यन्नक्षत्रमर्चिवत्” ऋ०७,८,९१,२, “यत्ते पवित्रमर्चिवदग्ने” ऋ०९,६७,२४। लोके तु अर्चिमान्। स्त्रियां ङीप्।

**अर्चिष्मत्** पु० अर्चिर्विद्यतेऽस्य मतुप्। १सूर्य्ये, २वह्नौ ३उपदेवभेदे च “अर्चिष्मांस्तुम्बुरुश्चैव भोरिश्च वदतांवरः। नेतारो देवदेवानामेते हि तपसान्विताः” हरिवं० ४दीप्ते त्रि०। स्त्रियां ङीप्। सा च ५अग्निपुर्य्याम्। इन्द्रलोकमुपवर्ण्य “एतस्यादक्षिणे भागे येयं दृश्येत पूः शुभा। इमामर्चिष्मतीं पश्य वीतहोत्रपुरीं शुभाम्” काशीख० विवरणमग्निलोकशब्दे। ५विष्णौ पु०अर्चितशब्दे उदा०।

**अर्चिस्** न० अर्च्च-इसि। १वह्न्यादेः शिखायां “प्रदक्षिणार्चिर्व्याजेन” “प्रदक्षिणार्चिर्हविरग्निराददे” “आसीदासन्ननिर्वाणप्रदीपार्चिरिवोषसि” इति च रघुः २मयूखे ३वह्नौ च पु० “तेऽर्चिषमभिसम्भवन्ति अर्चिषोऽहः” छा० उ० “अग्निर्ज्योतिरहः शुक्ल” इति गीतावाक्यैकवाक्य-